# श्रीसारदादेवीचरिते तपसः विमर्शः

Abstract of the dissertation

(An analysis of Austerity in the life of Śrī-Sāradā-Devī)


अशेषकल्याणगुणगणमण्डितः करुणाघनविग्रहः साक्षात्परमेश्वरः कलौ श्रीरामकृष्णपरमहंसरूपेण अवततार। तदीयम् अवतारत्वं तदानीन्तनाः योगिनः ज्ञानिनः महात्मानः विद्वद्वराश्च मुक्तकण्ठं गीतवन्तः। श्रीमद्-विवेकानन्दस्वामिपादैः अन्यैश्च सन्न्यासिशिष्यपुङ्गवैः भक्तैश्रेष्ठैश्च तदवतारतत्त्वं भूयो भूयः समदर्शि। भगवतः श्रीरामकृष्णपरमहंसस्य शक्तिस्वरूपिणी श्रीसारदादेवी सहधर्मचारिणी।

वङ्गेषु बाँकुडामण्डलस्य जयराम्बाटीग्रामे सात्त्विक-ब्राह्मण-दम्पत्योः रामचन्द्रमुखोपाध्याय-श्यामासुन्दर्योः दिव्यप्रकारेण श्रीसारदा समजनि। श्रीसारदायाः वास्तवं स्वरूपं प्रकाशयता श्रीरामकृष्णदेवेन भणितम् – "सा सारदा सरस्वती, ज्ञानं वितरितुम् अवतीर्णा" इति। अत एव भगवान् श्रीरामकृष्णः साधनानुष्ठानावसरे दक्षिणेश्वरे धर्मपत्नीं तां षोडशीरूपेण समभ्यर्च्य स्वानुष्ठिततपसः फलं जपमालां च तत्पादयोः समर्पयामास। तपोऽनुष्ठाने भर्तुः श्रीरामकृष्णस्य आदरातिशयं पश्यन्ती श्रीसारदा अपि स्वं समग्रं जीवनं तपोमयम् आपादयत्। अन्तरेण श्रीरामकृष्णपरमहंसदेवं देव्याः सारदायाः को वा गुरुः भवितुम् प्रभवेत्। एकदा लोके जनानां दुःखातिशयं स्वहृदये अनुभवन् व्याकुलीभूतः श्रीरामकृष्णपरमहंसः सहधर्मचारिणीं श्रीसारदाम् आदिदेश – कलिकातास्थजनाः कीटा इव दुःखार्णवावर्त्ते सततं बम्भ्रम्यन्ते निर्मोक्षं च न लभन्ते, तेषाम् उद्धाराय त्वं किमपि कुरु इति। एवं श्रीसारदायाः अवतारणस्य लक्ष्यं तत्सिद्धौ उपायांश्च प्रदर्श्य श्रीरामकृष्णपरमहंसदेवः महासमाधौ अलीयत। सद्गुणनिधेः श्रीसारदादेव्याः तपोऽनुष्ठानं लब्धोदया चन्द्रलेखा इव दिने दिने अवर्धत। शास्त्रोक्ततपसः अनुष्ठानम्, जपः, ध्यानम्, समाधिः तस्याः प्रात्यहिकजीवनं समन्ततः व्याप्नोत्। अत एव श्रीसारदया क्वचित् स्वयमेव उदीरितम् "आदर्शप्रतिष्ठापने यावद् इष्यते ततोऽधिकं सम्पादितं मया" इति।

फलमूलाशिनः तपस्विनः गिरिकन्दरेषु उषित्वा सहस्रवर्षाणि तपोऽनुष्ठाय यन्न साधितवन्तः तत् श्रीसारदया पत्युः अवतारपुरुषस्य सेवया तदुपदिष्टैः जपध्यानादिभिः कतिपयैरेव संवत्सरैः साधितम्। लोकोत्तरं तदीयं तपः अनितरसाधारणम्। परब्रह्मशक्तेः तस्याः तपसः औपम्यं तदीयम् तपः एव स्यात्, नान्यत्। एवम् अनन्यालङ्कारेण व्याहरणं विना नान्यः प्रकारः बुद्धिम् अध्यास्ते। श्रीसारदीयम् आचरणम्, वचः, चिन्तनम् इत्येतत् सर्वं "स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" इत्युक्तिदिशा जनानां प्रमाणभूतम् अभवत्। नारदभक्तिसूत्रे "सुकर्मीकुर्वन्ति कर्माणि" इति यद् गीतं तस्य समुज्ज्वलं निदर्शनं श्रीसारदायाः जीवनम्।

अवतारपुरुषस्य लीलासहचारिण्याः तस्याः तपोऽनुष्ठानस्य फलं तु लोकसङ्ग्रहाद् जगदुद्धाराद् नान्यद् भवितुम् अर्हति। इदं च श्रीसारदया स्वयम् उररीकृतम् "मत्पुत्राः शास्त्रोक्तं दुःसाध्यं कठोरं तपः अनुष्ठातुं न समर्थाः, अतः मयैव तेषां कृते तपोऽनुष्ठीयते। तदीया प्रार्थना अपि परहितप्रयुक्ता एव। भक्तजनानां सन्न्यासिशिष्याणां च हितं तया प्रत्यहं प्रार्थ्यते स्म "भगवन् तव पादयोः शरणागतानाम् ऐहिकं पारत्रिकं च श्रेयः विदधातु" इति। एवं लोकहितकामनया अहरहः तपः समनुष्ठाय श्रीसारदा स्वं पेलवं दैवं वपुः अशोषयत्।

तपःप्रतिपादकानि शास्त्रवाक्यानि श्रीसारदाचरिते कथं समनुयन्ति इत्येतद्विषयकः विमर्शः अत्र व्यधायि। भगवद्गीतायां सप्तदशाध्याये तपसः शारीरं वाचिकं मानसं चेति भेदत्रयम् अधिगम्यते। प्रकृतशोधप्रबन्धे भगवद्गीतोक्तस्य शारीरादितपसः श्रीसारदाचरिते समन्वयः प्रामुख्येन विचारितः। श्रीसारदादेवीचरिते अस्माभिः प्राधान्येन आश्रिताः ग्रन्थाः नीचैः दर्शिताः -

- स्वामिगम्भीरानन्दमहाराजैः विरचितः 'श्रीमा सारदा देवी'
- 'श्रीश्रीमायेर् कथा'
- ब्रह्मचारिणा अक्षयचैतन्यमहाराजेन प्रणीतः 'श्रीश्रीसारदादेवी'

- स्वामिसारदेशानन्दमहाराजेन प्रणीतः 'श्रीश्रीमायेर् स्मृतिकथा'
- स्वामिना ईशानानन्दमहाराजेन प्रणीतः 'मातृसान्निध्ये'
- मानदाशङ्करदाशगुप्तमहाभागैः प्रणीतः 'श्रीश्रीमा सारदामणि देवी' इत्यादिग्रन्था यथासम्भवम् अवलोकिताः।

शोधप्रबन्धस्य कलेवरः पञ्चसु अध्यायेषु प्रविभक्तः। प्रथमाध्याये श्रीसारदादेव्याः भौमलीला वर्णिता। श्रीसारदादेव्याः लोकोत्तरं चरितं अत्र साररूपेण कथितम्। द्वितीयाध्याये शास्त्रोक्तं तपसः स्वरूपं तत्प्रकाराश्च निरूपिताः। श्रीशङ्करभगवत्पादानां प्रस्थानत्रयभाष्यात्, कतिपयपुराणेभ्यः, महाभारतात्, रामायणात्, मनुस्मृतेः, याज्ञवल्क्यस्मृतेः, चितेभ्यः काव्येभ्यः च तपसः निर्वचनानि समाकलितानि। तृतीयाध्याये श्रीसारदाचरिते शारीरतपः पर्यवलोकितम्। भगवद्गीताप्रतिपादितं शारीरतपसः लक्षणम्, तीर्थाटनादि च विचारितम्। चतुर्थाध्याये श्रीसारदायाः वाचिकतपसः पर्यवेक्षणं विहितम्। भगवद्गीता-पुराणादिषु प्रतिपादितं वाचिकतपसः लक्षणसमन्वयं निरूप्य मन्त्रजपः अपि दर्शितः। पञ्चमाध्याये श्रीसारदायाः मानसं तपः समीक्षितम्। गीतायां पुराणादिषु च कथितं वाचिकं तपः श्रीसारदाचरिते कथं समन्वेति इत्येतद् विचारितम् अत्र।

उपसंहारे सर्वेषाम् अध्यायानां सारः निवेशितः। अन्ते परिशिष्टभागे प्रबन्धगतानां तपःप्रतिपादकानां शास्त्रवाक्यानां सङ्ग्रहः, श्रीसारदाचरितगतानां जनानां नामानि तेषां संक्षिप्तपरिचयः, श्रीसारदाचरिते स्मरणीयदिनानाम् आवलिः, प्रबन्धोद्धृतानां मन्त्राणां श्लोकानां शास्त्रवाक्यानां च सूची, श्रीसारदादेव्याः वंशपरम्परा, प्रबन्धगतानां देशवाचिशब्दानां तालिका, परामृष्टग्रन्थावलिः च प्रदत्ता।

*****